श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामोदन्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामोदन्तम् ॥

## ॥ अथ बालकाण्डः ॥

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम्।
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम्॥ **1.1** ॥

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ॥ **1.2** ॥

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम्।
वव्रिरे च वरानिष्टानस्मादाश्रितवत्सलात्॥ **1.3** ॥

रावणो मानुषादन्यैरवध्यत्वं तथाऽनुजः।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च॥ **1.4** ॥

विभीषणो विष्णुभक्तिं वव्रे सत्वगुणान्वितः।
तेभ्य एतान् वरान् दत्वा तत्रैवान्तर्दधे प्रभुः॥ **1.5** ॥

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम्।
लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत् सुखम्॥ **1.6** ॥

यातुधानास्ततः सर्वे रसातलनिवासिनः।
दशाननं समाश्रित्य लङ्कां च सुखमावसन्॥ **1.7** ॥

मन्दोदरीं मयसुतां परिणीय दशाननः।
तस्यामुत्पादयामास मेघनादाह्वयं सुतम्॥ **1.8** ॥

रसां रसातलं चैव विजित्य स तु रावणः।
लोकानाक्रमयन् सर्वाञ्जहार च विलासिनीः॥ **1.9** ॥

दूषयन् वैदिकं कर्म द्विजानर्दयति स्म सः।
आत्मजेन ततो युद्धे वासवं चाप्यपीडयत्॥ **1.10** ॥

तदीयतरुरत्नानि पुनरानाय्य किङ्करैः।
स्थापयित्वा तु लङ्कायामवसच्च चिराय सः॥ **1.11** ॥

ततस्तस्मिन्नवसरे विधातारं दिवौकसः।
उपगम्योचिरे सर्वं रावणस्य विचेष्टितम्॥ **1.12** ॥

तदाकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेस्तटम्।
तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः॥ **1.13** ॥

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम्।
किमर्थमागतोऽसि त्वं साकं देवगणैरिति॥ **1.14** ॥

ततो दशाननात् पीडामजस्तस्मै न्यवेदयत्।
तच्छ्रुत्वोवाच धातारं हर्षयन् विष्टरश्रवाः॥ **1.15** ॥

अलं भयेनात्मयोने गच्छ देवगणैः सह।
अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम्॥ **1.16** ॥

आत्मांशैश्च सुराः सर्वे भूमौ वानररूपिणः।
जायेरन् मम साहाय्यं कर्तुं रावणनिग्रहे॥ **1.17** ॥

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः।
पद्मयोनिस्तु गीर्वाणैः समं प्रायात् प्रहृष्टधीः॥ **1.18** ॥

अजीजनत्ततः शक्रो वालिनं नाम वानरम्।
सुग्रीवमपि मार्ताण्डो हनुमन्तं च मारुतः॥ **1.19** ॥

पुरैव जनयामास जाम्बवन्तं च पद्मजः।
एवमन्ये च विबुधाः कपीनजनयन् बहून्॥ **1.20** ॥

ततो वानरसङ्घानां वाली परिवृढोऽभवत्।
अमीभिरखिलैः साकं किष्किन्धामध्युवास च॥ **1.21** ॥

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः।
भार्यास्तिस्रोऽपि लब्ध्वाऽसौ तासु लेभे न सन्ततिम्॥ **1.22** ॥

ततः सुमन्त्रवचनादृष्यशृङ्गं स भूपतिः।
आनीय पुत्रकामेष्टिमारेभे सपुरोहितः॥ **1.23** ॥

अथाग्नेरुत्थितः कश्चिद्गृहीत्वा पायसं चरुम्।
एतत्प्राशय पत्नीस्त्वमित्युक्त्वाऽदान्नृपाय सः॥ **1.24** ॥

तद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः।
ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन्॥ **1.25** ॥

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम्।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा॥ **1.26** ॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्राऽजीजनत् सुतौ।
अकारयत्पिता तेषां जातकर्मादिकं द्विजैः॥ **1.27** ॥

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते।
सकलासु च विद्यासु नैपुण्यमभिलेभिरे॥ **1.28** ॥

ततः कदाचिदागत्य विश्वामित्रो महामुनिः।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम्॥ **1.29** ॥

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम्।
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ॥ **1.30** ॥

तौ गृहीत्वा ततो गच्छन् बलामतिबलां तथा।
अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः॥ **1.31** ॥

गच्छन् सहानुजो रामः कौशिकेन प्रचोदितः।
ताटकामवधीद्धीमान् लोकपीडनतत्पराम्॥ **1.32** ॥

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः।
अध्वरं च समारेभे राक्षसाश्च समागमन्॥ **1.33** ॥

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे।
सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः॥ **1.34** ॥

कौशिकेन ततो रामो नीयमानः सहानुजः।
अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम्॥ **1.35** ॥

जनकेनार्चितो रामः कौशिकेन प्रचोदितः।
सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम्॥ **1.36** ॥

ततो दशरथं दूतैरानाय्य मिथिलाधिपः।
रामादिभ्यस्ततस्तेभ्यः सीताद्याः कन्यका ददौ॥ **1.37** ॥

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः।
राघवो निर्ययौ तेन जनकेनोरु मानितः॥ **1.38** ॥

तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम्।
विजित्य भार्गवं राममयोध्यां प्राप राघवः॥ **1.39** ॥

ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः।
तामध्युवास काकुत्स्थः सीतया सहितः सुखम्॥ **1.40** ॥

॥ इति श्रीरामोदन्ते बालकाण्डः समाप्तः ॥

## ॥ अथ अयोध्याकाण्डः ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः॥ **2.1** ॥

ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः।
अभिषेकाय रामस्य समारेभे मुदाऽन्वितः॥ **2.2** ॥

कैकेयी तु महीपालं मन्थरादूषिताशया।
वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम्॥ **2.3** ॥

वनवासाय रामस्य राज्याप्त्यै भरतस्य च।
तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः॥ **2.4** ॥

रामं तदैव कैकेयी वनवासाय चादिशत्।
अनुज्ञाप्य गुरून् सर्वान्निर्ययौ च वनाय सः॥ **2.5** ॥

दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः।
संत्यज्य स्वगृहान् सर्वे पौराश्चानुययुर्द्रुतम्॥ **2.6** ॥

वञ्चयित्वा कृशान् पौरान् निद्राणान्निशि राघवः।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत्॥ **2.7** ॥

श्रिङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः।
गुहेन सत्कृतस्तत्र निशामेकामुवास च॥ **2.8** ॥

सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः।
गुहेनानीतया नावा सन्ततार च जाह्नवीम्॥ **2.9** ॥

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः।
राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत् सुखम्॥ **2.10** ॥

अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः।
राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम्॥ **2.11** ॥

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः।
रामरामेति विलपन् देहं त्यक्त्वा दिवं ययौ॥ **2.12** ॥

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः।
दूतैरानाययामासुः भरतं मातुलालयात्॥ **2.13** ॥

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा।
संस्कारादि चकारास्य यथाविधि सहानुजः॥ **2.14** ॥

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा।
वनायैव ययौ राममानेतुं नागरैः सह॥ **2.15** ॥

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम्।
ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह॥ **2.16** ॥

चतुर्दश समा नीत्वा पुनरैष्याम्यहं पुरीम्।
इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत्॥ **2.17** ॥

गृहीत्वा पादुके तस्माद्भरतो दीनमानसः।
नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम्॥ **2.18** ॥

राघवस्तु गिरेस्तस्माद्गत्वाऽत्रिं समवन्दत।
तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत्॥ **2.19** ॥

उषित्वा तु निशामेकामाश्रमे तस्य राघवः।
विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः॥ **2.20** ॥

॥ इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः ॥

## ॥ अथ आरण्यकाण्डः ॥

व्रजन् वनेन काकुत्स्थो विराधं विधिचोदितम्।
सदारानुजमात्मानं हरन्तमवधीत्तदा ॥ **3.1** ॥

शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः।
प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ **3.2** ॥

तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः।
अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥ **3.3** ॥

रामाय वैष्णवं चापमैन्द्रं तूणीयुगं तथा।
ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥ **3.4** ॥

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम्।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥ **3.5** ॥

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम्।
पर्णशालामध्युवास सीतया सहितः सुखम् ॥ **3.6** ॥

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका।
तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥ **3.7** ॥

राममेव ततो वव्रे कामार्ता कामसन्निभम्।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ **3.8** ॥

लक्ष्मणेन तदा रोषात्कृत्तश्रवणनासिका।
सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥ **3.9** ॥

तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ।
दूषणत्रिशिरोमुख्यैर्यातुधानैः समन्वितः ॥ **3.10** ॥

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः।
खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः॥ **3.11** ॥

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः॥ **3.12** ॥

तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा।
मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत्॥ **3.13** ॥

सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत्।
सा तु तं मृगमाहर्तुं भर्तारं समयाचत॥ **3.14** ॥

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः।
अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे॥ **3.15** ॥

विव्याध च मृगं रामः स निजं रूपमास्थितः।
हा सीते लक्ष्मणेत्येवं रुदन् प्राणान् समत्यजत्॥ **3.16** ॥

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम्।
तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम्॥ **3.17** ॥

तदन्तरं समासाद्य रावणो यतिरूपधृत्।
सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः॥ **3.18** ॥

ततो जटायुरालोक्य नीयमानां तु जानकीम्।
प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम्॥ **3.19** ॥

छित्वैनं चन्द्रहासेन पातयित्वा च भूतले।
गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम्॥ **3.20** ॥

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम्।
रावणो रक्षितुं चैनां नियुयोज निशाचरीः॥ **3.21** ॥

हत्वा रामस्तु मारीचमागच्छन्ननुजेरिताम्।
वार्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत्॥ **3.22**॥

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे।
सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः॥ **3.23**॥

तेनोक्तां जानकीवार्तां श्रुत्वा पश्चान् मृतं च तम्।
दग्ध्वा सहानुजो रामश्चक्रे तस्योदकक्रियाम्॥ **3.24**॥

आत्मनोऽभिभवं पश्चात् कुर्वतीं पथि लक्ष्मणः।
अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम्॥ **3.25**॥

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम्।
ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ॥ **3.26**॥

स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये।
सुग्रीवमृष्यमूकस्थं याहीत्युक्त्वा दिवं ययौ॥ **3.27**॥

ततः प्रीतो रघुश्रेष्ठः शबर्याश्रममभ्ययात्।
तयाऽभिपूजितः पश्चात् पम्पां प्राप सलक्ष्मणः॥ **3.28**॥

॥ इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः॥

## ॥ अथ किष्किन्धाकाण्डः॥

हनूमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ।
प्राप्य श्रुत्वा तु वृत्तान्तं तेन तौ समयोजयत्॥ **4.1**॥

ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः।
सख्यं च कारयामास तयोः पावकसन्निधौ॥ **4.2**॥

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम्।
दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम्॥ **4.3** ॥

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम्।
निवेदितमशेषं च बलाधिक्यं च तस्य तत्॥ **4.4** ॥

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम्।
सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः॥ **4.5** ॥

पुनश्च दर्शितांस्तेन सालान् सप्त रघूत्तमः।
बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया॥ **4.6** ॥

किष्किन्धां प्राप्य सुग्रीवस्ततो रामसमन्वितः।
जगर्जातीव संहृष्टः कोपयन् वानराधिपम्॥ **4.7** ॥

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद् भृशम्।
सोऽपि सम्भग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम्॥ **4.8** ॥

कृतचिह्नस्तु रामेण पुनरेव स वालिनम्।
रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः॥ **4.9** ॥

हेममाली ततो वाली तारयाऽभिहितं हितम्।
निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम्॥ **4.10** ॥

बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत्।
सोऽपि राम इति ज्ञात्वा देहं त्यक्त्वा दिवं ययौ॥ **4.11** ॥

पश्चात्तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः।
वानराणामधिपतिं चकाराश्रितवत्सलः॥ **4.12** ॥

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः।
उवास चतुरो मासान् सीताविरहदुःखितः॥ **4.13** ॥

अथ रामस्य निर्देशाल्लक्ष्मणो वानराधिपम्।
आनयत् प्लवगैः सार्धं हनूमत्प्रमुखैर्गिरिम्॥ **4.14** ॥

सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान्।
न्ययुङ्क्त सीतामन्वेष्टुमाशासु चतसृष्वपि॥ **4.15** ॥

ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम्।
विश्वासाय तु वैदेह्यास्तद्गृहीत्वा स निर्ययौ॥ **4.16** ॥

ततो हनूमत्प्रमुखा वानरा दक्षिणां दिशम्।
गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन्॥ **4.17** ॥

समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम्।
तेऽत्र सम्पातिना प्रोक्तां सीतावार्तां च शुश्रुवुः॥ **4.18** ॥

ततः प्रापुरुदन्वन्तमङ्गदाद्याः प्लवङ्गमाः।
तं विलङ्घयितुं तेषां न कश्चिदभवत् क्षमः॥ **4.19** ॥

स्वप्रभावप्रशंसाभिस्तदा जाम्बवदुक्तिभिः।
संवर्धितो महेन्द्राद्रिमारुरोहानिलात्मजः॥ **4.20** ॥

॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः ॥

## ॥ अथ सुन्दरकाण्डः ॥

अभिवाद्याथ सकलानमरान् पवनात्मजः।
पुप्लुवे च गिरेस्तस्माद्विलङ्घयितुमर्णवम्॥ **5.1** ॥

स समुल्लङ्घ्य मैनाकं सुरसामभिवाद्य च।
निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः॥ **5.2** ॥

लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः।
सीतां विचिन्वन्नद्राक्षीन्निद्राणं निशि रावणम् ॥ **5.3** ॥

अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥ **5.4** ॥

पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ **5.5** ॥

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः।
भार्या भव ममेत्येवं बहुधा समयाचत ॥ **5.6** ॥

अहं त्वदनुगा न स्यामित्येषा तं निराकरोत्।
काममन्युपरीतात्मा रावणोऽथ गृहं ययौ ॥ **5.7** ॥

गते तु रावणे सीतां प्रलपन्तीं स मारुतिः।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥ **5.8** ॥

तत्समादाय वैदेही विलप्य च भृशं पुनः।
चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम् ॥ **5.9** ॥

मा विषादं कृथा देवि राघवो रावणं रणे।
हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ॥ **5.10** ॥

नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत्।
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥ **5.11** ॥

ततः शक्रजिता युद्धे बद्धः पवननन्दनः।
प्रतापं रघुनाथस्य रावणाय न्यवेदयत् ॥ **5.12** ॥

रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः।
दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ॥ **5.13** ॥

स गत्वा वानरैः साकं राघवायात्मना कृतम्।
निवेदयित्वा सकलं ददौ चूडामणिं च तम्॥ **5.14**॥

॥ इति श्रीरामोदन्ते सुन्दरकाण्डः समाप्तः॥

**॥ अथ युद्धकाण्डः॥**

अथासङ्ख्यैः कपिगणैः सुग्रीवप्रमुखैः सह।
निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः॥ **6.1**॥

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत्।
लङ्काधिपत्येऽभ्यषिञ्चदेनं रामोऽरिमर्दनः॥ **6.2**॥

उक्तमार्गः समुद्रेण तत्र सेतुं नलेन सः।
कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम्॥ **6.3**॥

ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः।
रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः॥ **6.4**॥

रावणस्य नियोगेन निर्गतान् युधि राक्षसान्।
प्रहस्तप्रमुखान् हत्वा नेदुस्ते सिंहविक्रमाः॥ **6.5**॥

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ।
राक्षसान् सुबहून् युद्धे जघ्नुर्भीमपराक्रमाः॥ **6.6**॥

रावणिस्तु ततोऽभ्येत्य समरे रामलक्ष्मणौ।
ननाह नागपाशेन नागारिस्तौ व्यमोचयत्॥ **6.7**॥

रावणोऽपि ततो युद्धे राघवेण पराजितः।
कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च॥ **6.8**॥

ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम्।
ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम्॥ **6.9**॥

ततो रावणसन्दिष्टौ देवान्तकनरान्तकौ।
हनूमदङ्गदाभ्यां तु निहतौ रणमूर्धनि ॥ **6.10** ॥

अथातिकायमायान्तं रथमारुह्य वाहिनीम्।
अर्दयन्तं महाकायं लक्ष्मणश्चाऽवधीच्छरैः ॥ **6.11** ॥

ततो रावणसन्दिष्टः शक्रजिद्राघवौ रणे।
ब्रह्मास्त्रेण च तौ बद्ध्वा वानरांश्चाऽवधीच्छरैः ॥ **6.12** ॥

अथ जाम्बवतो वाक्याद्गत्वा चौषधिपर्वतम्।
मारुतिश्चौषधीस्तत्रादृष्ट्वा कोपं चकार सः ॥ **6.13** ॥

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः।
तासां गन्धेन वै सर्वान् राघवादीनजीवयत् ॥ **6.14** ॥

रावणः कपिभिर्दग्धां पुरीं वीक्ष्य रुषाऽन्वितः।
न्ययुङ्क्त कुम्भकर्णस्य पुत्रौ हन्तुं च राघवौ ॥ **6.15** ॥

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ।
कुम्भं रामोऽवधीद्बाणैर्निकुम्भं चात्मजो रवेः ॥ **6.16** ॥

ततः खरात्मजं तेन रावणेन प्रचोदितम्।
पीडयन्तं कपीन् बाणैर्जघानास्त्रेण राघवः ॥ **6.17** ॥

ततः सन्तप्तहृदयो रावणो युद्धदुर्मदम्।
प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ ॥ **6.18** ॥

नगरान्निर्ययौ तूर्णमिन्द्रजित्समितिञ्जयः।
मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै ॥ **6.19** ॥

वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च।
जघान सीतां खड्गेन शितेन समितिञ्जयः ॥ **6.20** ॥

युद्धं त्यक्त्वा ततः सर्वैर्वानरैः स परीवृतः।
दुःखितो हनुमांस्तत्र यत्र रामोऽव्रजल्लघु ॥ **6.21** ॥

उपगम्याब्रवीद्रामं हनूमान्निखिलं तदा।
श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप सः ॥ **6.22** ॥

विभीषणोऽथ सम्प्राप्य दृष्ट्वा रामं च मूर्छितम्।
विषण्णान् वानरान् वाचा सान्त्वयन्निदमब्रवीत् ॥ **6.23** ॥

मिथ्या विषादं सन्त्यज्य जगन्नायक हे प्रभो।
शृणु मेऽभिहितं वाक्यं ज्ञात्वा रावणिमानसम् ॥ **6.24** ॥

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै।
निकुम्भिलायां होमं तु कर्तुं तेनाधुना किल ॥ **6.25** ॥

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा।
कृते होमे तत्र रिपुरजेयो भवति ध्रुवम् ॥ **6.26** ॥

उवाच रामः सौमित्रिं राक्षसेन्द्रसुतं जहि।
गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन सः ॥ **6.27** ॥

लक्ष्मणस्तु तदा राममामन्त्र्य सविभीषणः।
निकुम्भिलां प्राप तूर्णमिन्द्रजिद्यत्र वर्तते ॥ **6.28** ॥

अदर्शयद्भ्रातृपुत्रं धर्मात्मा स विभीषणः।
लक्ष्मणो भेदयामास राक्षसाञ्छरसञ्चयैः ॥ **6.29** ॥

कृत्वा चिरं तत्र युद्धमैन्द्रेणास्त्रेण वै रुषा।
शिरश्चिच्छेद सौमित्रिर्दशाननसुतस्य हि ॥ **6.30** ॥

स सुतस्य वधं श्रुत्वा रावणः शोककर्शितः।
नष्टधैर्यो विह्वलाङ्गो विललापाकुलेन्द्रियः ॥ **6.31** ॥

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम्।
येनाहमद्य पश्यामि हतमिन्द्रजितं रणे॥ **6.32**॥

क्व गतोऽसि हतः शूर मानुषेण पदातिना।
राज्याद्भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र जीवितम्॥ **6.33**॥

इन्द्रं जित्वा तु तं बद्ध्वा लङ्कामानीय वै बलात्।
अकरोस्त्वं प्रतापेन कारागृहनिवासिनम्॥ **6.34**॥

मोचयामास ब्रह्मा त्वां सान्त्वयित्वाऽमराधिपम्।
तादृक्त्वं कुत्र मां त्यक्त्वा गतोऽद्य सुदुरासदः॥ **6.35**॥

किं करिष्याम्यहं पुत्र क्व गच्छामि वदाधुना।
नय मां यत्र गन्तासि तत्र ते न विलम्बनम्॥ **6.36**॥

लोकेषु त्वत्समो नास्ति तादृशस्य पिताऽस्म्यहम्।
इत्याशया स्थितं पुत्र गर्वितेन मयाऽत्र हि॥ **6.37**॥

धूम्राक्षो वज्रदंष्ट्रश्च कुम्भकर्णः प्रतापवान्।
राक्षसा निहताः सर्वे प्रहस्तप्रमुखा अपि॥ **6.38**॥

अनादृत्य तु तान् सर्वान् राक्षसान् प्रहृतानपि।
अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव॥ **6.39**॥

इत्येवं बहुधा तत्र विलप्य स तु रावणः।
अन्तर्नियम्य दुःखानि कोपं चक्रे सुदारुणम्॥ **6.40**॥

रथं सूत ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः।
रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात्॥ **6.41**॥

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम्।
रामेण सह सङ्गम्य युद्धं चक्रे सुदारुणम्॥ **6.42**॥

ततो मातलिनाऽनीतं रथमैन्द्रं समारुहन्।
रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः॥ **6.43** ॥

चकार युद्धं तुमुलं देववृन्दे च पश्यति।
सीताहरणजात् कोपाद्रामो धर्मभृतां वरः॥ **6.44** ॥

अथागस्त्यस्य वचनाद्रावणं लोककण्टकम्।
जघान रामो लक्ष्मीवान् ब्राह्मेणास्त्रेण तं रणे॥ **6.45** ॥

मन्दोदरी वधं श्रुत्वा भर्तुः प्रियतरस्य सा।
विललाप रणं गत्वा कुररीव भृशातुरा॥ **6.46** ॥

विभीषणोऽथ रामेण सन्दिष्टः सह राक्षसैः।
चकार दहनं तस्य रावणस्य गतायुषः॥ **6.47** ॥

अथाग्निवचनात् सीतां रामो वीक्ष्य सुनिर्मलाम्।
सन्दिष्टो देववृन्दैश्च जग्राह पितृसन्निधौ॥ **6.48** ॥

तवैव युक्तं कर्मैतत् सर्वलोकभयङ्करम्।
तद्वैदेह्याः कृते राम सा तु लक्ष्मीर्भवान् स्वभूः॥ **6.49** ॥

इत्येवं देवसङ्घैश्च मुनिभिश्चाभिपूजितः।
लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ॥ **6.50** ॥

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः।
कारयामास लक्ष्मीवाननुजेनाभिषेचनम्॥ **6.51** ॥

ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः।
भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः॥ **6.52** ॥

किष्किन्धानिलयाः सर्वाः कपीनां योषितः प्रियाः।
सीताकुतूहलात् पुष्पं विमानं ताः समारुहन्॥ **6.53** ॥

अथ दाशरथिः श्रीमान् भरतं द्रष्टुमिच्छया।
भरद्वाजाश्रमं प्राप्तस्तत्र तेन निवारितः॥ **6.54** ॥

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम्।
रामस्यादर्शनाद्वह्निप्रवेशं काङ्क्षतो भृशम्॥ **6.55** ॥

तत्र तेन मुनीन्द्रेण सानुजः ससुहृद्गणः।
सन्तोषविवशेनाथ रामोऽपि विधिपूजितः॥ **6.56** ॥

रामोऽथ सह सङ्गम्य भरतेनारिघातिना।
अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दितः॥ **6.57** ॥

अथायोध्यानिवासास्ते जनाः सर्वेऽपि तोषिताः।
अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम्॥ **6.58** ॥

चातकास्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून्।
आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि॥ **6.59** ॥

अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्विताः।
सहिता मन्त्रिभिश्चक्रुर्वसवो वासवं यथा॥ **6.60** ॥

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः।
यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः॥ **6.61** ॥

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम्।
पूजितश्च तथा लेभे यथा सीतावलोकने॥ **6.62** ॥

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला।
भूषणैर्भूषयामास वस्त्रचन्दनकुङ्कुमैः॥ **6.63** ॥

रामाज्ञयाऽथ सर्वेऽपि सुग्रीवादिप्लवङ्गमाः।
किष्किन्धां लेभिरे कृच्छ्राच्छ्रीरामविरहातुराः॥ **6.64** ॥

अतिभक्तो दीर्घजीवी लङ्कासमरसाधकः।
अनुज्ञातः स रामेण लङ्कां प्रायाद्विभीषणः॥ **6.65** ॥

पितुस्सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे॥ **6.66** ॥

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान्।
भरतायाप्रमेयाय प्राणात् प्रियतराय सः॥ **6.67** ॥

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः।
खे सतारो यथा चन्द्रस्तथा रेजुः स्वपत्तने॥ **6.68** ॥

॥ इति श्रीरामोदन्ते युद्धकाण्डः समाप्तः ॥

**॥ अथ उत्तरकाण्डः ॥**

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम्।
इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम्॥ **7.1** ॥

तद्विदित्वाऽथ वाल्मीकिरानीयैनां निजाश्रमम्।
अन्तर्वत्नीं समाश्वास्य तत्रैवावासयत् सुखम्॥ **7.2** ॥

ऋषिभिः प्रार्थितस्याथ राघवस्य नियोगतः।
शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत्॥ **7.3** ॥

रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति।
आनीय ससुतां सीतां तस्मै प्राचेतसो ददौ॥ **7.4** ॥

शङ्क्यमाना पुनश्चैवं रामेण जनकात्मजा।
भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा॥ **7.5** ॥

अथ रामस्य निर्देशात् पौरैः सह वनौकसः।
निमज्ज्य सरयूतीर्थे देहं त्यक्त्वा दिवं ययुः॥ **7.6** ॥

ततो भरतशत्रुघ्नौ निजं रूपमवापतुः।
रामोऽपि मानुषं देहं त्यक्त्वा धामाविशत् स्वकम्॥ **7.7**॥

श्रीरामोदन्तमाख्यातमिदं मन्दधिया मया।
समीक्ष्य निपुणैस्सद्भिः संशोध्य परिगृह्यताम्॥ **7.8**॥

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम्।
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः॥ **7.9**॥

॥ इति श्रीरामोदन्ते उत्तरकाण्डः समाप्तः॥

॥ श्रीरामोदन्तं समाप्तम्॥